ब्रह्मादीनां परस्थाम त्रयाणामपि संस्थितिः । वेदमूर्त्तिवतः पूषा पूजनीयः प्रयत्नतः । तस्मादग्निद्विजमुखान् कृत्वा संपूजयेदिमान् । दानैर्व्रतोपवासैश्च जपहोमादिना नरः । इति क्रियायोगपरायणस्य वेदान्तशास्त्रस्मृतिवत्सलस्य । विकर्म्मभीतस्य सदा न किञ्चित् प्राप्तव्यमस्तीह परे च लोके” । २क्रियासम्बन्धे “उपसर्गाः क्रियायोगे” पा० पद्मपुराणे क्रियायोगसारे विवृतिः ।

क्रियार्थ त्रि० क्रिया अनुष्ठानमर्थोऽभिधेयोयस्य । कर्त्तव्यविधिबोधके वेदादिवाक्यभेदे तादृशवाक्यस्यैव प्रामाण्यम् मीमांसायां स्थापितं यथा

“आम्नायस्य क्रियार्थत्वादानार्थक्यमतदर्थानाम्” जै० सू० । “क्रिया कथमनुष्ठेया इति तां वदितुं समाम्नातारो वाक्यानि समामनन्ति यानि क्रियां नावगमयन्ति क्रियासम्बद्धं वा किञ्चित् तान्येव भूतमर्थमन्वाचक्षते” “अतस्तेषामानर्थक्यम् (अप्रामाण्यम्)” इति च शवरभा० । “चोदनालक्षणोऽर्थो धर्म्मः” जै० सू० । “चोदनेति क्रियायाः प्रवर्त्तकं वचनमाहुः । चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुं नान्यत् किञ्चनेन्द्रियमिति” भा० । तेन क्रियाप्रवर्त्तकवेदभागानामेव प्रामाण्यम् अर्थवादानां भूतार्थानां तु क्रियार्थेन सहैकवाक्यत्वाद् प्रामाण्यं यथाह तत्रैव “विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः” जै० सू० । “वायव्यं श्वेतमालभेत भूतिकामः” “वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागेनोपधावतीति स एवैनं भूतिं गमयतीति” वायुर्वै क्षेपिष्ठा देवतेत्यत्र यद्यपि क्रिया नावगम्यते क्रियासम्बद्धं किञ्चित्, तथापि विध्युद्देशेनैकवाक्यत्वात् प्रमाणं भूतिकामइत्येवमन्तोविध्युद्देशः तेनैकवाक्यभूतो वायुर्वै क्षेपिष्ठा देवतेत्येवमादिः” । “पदानां साकाङ्क्षत्वात् विधेः स्तुतेश्चैकवाक्यत्वं भवति भूतिकाम आलभेत, कस्मात् ? यतो वायुः क्षेपिष्ठेति” । “स्तुत्यर्थेन विधीनां स्युः स्तुतिशब्दाः स्तुवन्तः क्रियां, प्ररोचयमानाः अनुष्ठातॄणामुपकरिष्यन्ति क्रियायाः” इति च भा० । “तद्भूतार्थानां तु क्रियार्थेन समाम्नायः” जै० सू० तेन सहैकवाक्यात् प्रामाण्यमिति स्थितम् । तदेतन्मतं विशदीकृत्य पूर्बपक्षीकृत्य शा० सू० भाष्याभ्यां निराकृतं यथा “कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते ? यावता ‘आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्” इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम्, अतोवेदान्तानामानर्थक्यम्, अक्रियार्थत्वात् । कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वमुपासनादिक्रियान्तरविधानार्थत्वं वा । न हि परिनिष्ठितवस्तुस्वरूपप्रतिपादनं सम्भवति प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः । तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात् । अत एव “सोऽरोदीत्” इत्यादीनामानर्थक्यं मा भूदिति “विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः” इति स्तावकत्वेनार्थवत्त्वमुक्तम् । मन्त्राणाञ्च “इषे त्वा” इत्यादीनां क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम् । न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टा उपपन्ना वा । न च परिनिष्ठिते वस्तुस्वरूपे विधिः सम्भवति, क्रियाविषयत्वाद्विधेः । तस्मात् कर्म्मापेक्षितकर्त्तृदेवतादिस्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम् । अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते तथापि स्ववाक्यगतोपासनादिकर्मपरत्वम् । तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते” भाष्यम् । “तत्तु समन्वयात्” शारीरकसूत्रम् ।

“तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादवगम्यते । कथम् ? समन्वयात् । सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैव तस्यार्थस्य प्रतिपादकत्वेन समनुगतानि “सदेव सौम्येदमग्र आसीत्” “एकमेवाद्वितीयं ब्रह्म” “आत्मा वा इदमेक एवाग्र आसीत्” “तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्” “अयमात्मा ब्रह्म सर्व्वानुभूः” “ब्रह्मवेदममृतं पुरस्ताद्” इत्यादीनि । न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् । न च तेषां कर्त्तृदेवतादिस्वरूपप्रतिपादनपरतावसीयते । ‘तत् केन कं पश्येद्” इत्यादिक्रियाकारकफलनिराकरणश्रुतेः । न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वम् । ‘तत्त्वमसि” इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात् । यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति नैष दोषः हेयोपादेयशून्यब्रह्मात्मावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः” । तत्रैव सूत्रे व्याख्यानशेषे

“यदपि शास्त्रतात्पर्यविदामनुक्रमणम् । “दृष्टो हि तस्यार्थः कर्मावबोधनमित्येवमादिः” तद्धर्म्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम् । अपि च “आम्नायस्य क्रियार्थत्वादानार्थक्यमतदर्थानाम्” इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः प्रवृत्तिनिवृत्ति-